# MPPSC

**Previous Year Paper**

**Assistant Professor**

**Sanskrit Grammar 2017**

**Assistant Professor Exam - 2017**

**(Final Answer Key)**

**Sanskrit Grammer**

| | |
|---|---|
| Q.No: 1 | "कौमुदीयं विरच्यते" इत्यत्र कस्मिन्नर्थे लकार: ? |
| A | भावे |
| **B** | कर्मणि |
| C | कर्तरि |
| D | करणे |

| | |
|---|---|
| Q.No: 2 | हलन्त्यमित्यत्र, अन्योन्याश्रयदोषपरिहाराय भट्टोजिदीक्षितेन क: पक्ष: स्वीकृत: ? |
| **A** | आवृत्ति: |
| B | तन्त्रम् |
| C | एकशेष: |
| D | समाहारद्वन्द्वः |

| | |
|---|---|
| Q.No: 3 | भट्टोजिदीक्षितमते, उपदेशशब्द:? |
| **A** | भावघञन्त: |
| B | करणघञन्त: |

C कर्मघञन्त:

D कर्तृघञन्त:

Q.No: 4 अ, इति संज्ञा कतिवर्णानां वर्तते ?

A चतुर्विंशते:

B अष्टादशानाम्

C द्वादशानाम्

D दशानाम्

Q.No: 5 नाञ्झलौ इत्यत्र दीर्घाकारप्रश्लेषे लिङ्गम् ?

A कालसमयेवलासु तुमुन्

B हो ढ:

C आदेशप्रत्यययो:

D नामि

Q.No: 6 उपसर्गा: सन्ति: ?

A द्वादश

B द्वाविंशति:

C चतुर्विंशतिः

D विंशतिः

Q.No: 7 चादयोऽसत्वे इति सूत्रेण विधीयते ?

A उपसर्गसंज्ञा

B विभाषासंज्ञा

C धातुसंज्ञा

D निपातसंज्ञा

Q.No: 8 नवेति विभाषा, इत्यत्र इति शब्दस्य किं प्रयोजनम् ?

A जातिबोधनम्

B स्वरूपबोधनम्

C अर्थबोधनम्

D संज्ञाबोधनम्

Q.No: 9 मनीषा इत्यस्य सन्धिविच्छेदो भवति ?

A मनि इषा

B मन् ईषा

| | |
|---|---|
| C | मनस् ईषा |
| D | मनीष् आ |

| | |
|---|---|
| Q.No: 10 | ईदूतौ च सप्तम्यर्थे इत्यनेन भवति ? |
| A | गुणसंज्ञा |
| B | प्रकृतिभावः |
| C | प्लुतसंज्ञा |
| D | प्रगृह्यसंज्ञा |

| | |
|---|---|
| Q.No: 11 | दन्तोष्ठ: इत्यत्र भवति ? |
| A | गुण: |
| B | पूर्वरूपम् |
| C | पररूपम् |
| D | प्रकृतिभाव: |

| | |
|---|---|
| Q.No: 12 | "आच्छादयति" इत्यत्र केन सूत्रेण तुगागमो भवति ? |
| A | दीर्घात् |
| B | आङ्माङोश्च |

| | |
|---|---|
| C | पदान्ताद्वा |
| D | छे च |

| | |
|---|---|
| Q.No: 13 | सर्पिष्पाशम् इत्यत्र केन सूत्रेण विसर्गस्य मूर्धन्यादेश: ? |
| A | इदुदुपधस्य चाप्रत्यय: |
| B | कस्कादिषु च |
| **C** | इण: ष: |
| D | इसुसो:सामर्थ्ये |

| | |
|---|---|
| Q.No: 14 | "अधश्शिरसी पदे" इत्यनेन भवति ? |
| **A** | सादेश: |
| B | विसर्ग: |
| C | रेफादेश: |
| D | मूर्धन्यादेश: |

| | |
|---|---|
| Q.No: 15 | "ओतो गार्ग्यस्य" इति सूत्रेण भवति ? |
| A | सलोप: |
| **B** | यलोप: |

C रलोपः

D विसर्गः

Q.No: 16 ई३चाक्रवर्मणस्य इत्यनेन भवति ?

A प्लुतः

B ईकारः

C प्रगृह्यम्

**D अप्लुतवद्भावः**

Q.No: 17 "सञ्छम्भुः इत्यत्र रूपाणि भवन्ति?

A त्रीणि

**B चत्वारि**

C पञ्च

D द्वे

Q.No: 18 प्रत्ययार्थः केन सम्बन्धेन व्रीहौ विशेषणम् ?

A अभेदेन

B समवायेन

| | |
|---|---|
| C | परिच्छेद्य-परिच्छेदकभावेन |
| D | संयोगेन |

| | |
|---|---|
| Q.No: 19 | कर्तुरीप्सिततमं कर्म इति सूत्रे "कर्तुः" इत्यत्र केन सूत्रेण षष्ठी ? |
| A | षष्ठी शेषे |
| B | यतश्च निर्धारणम् |
| C | कर्तृकर्मणोः कृति |
| D | क्तस्य च वर्तमाने |

| | |
|---|---|
| Q.No: 20 | दुह्यादिद्विकर्मकधातवः कति सन्ति ? |
| A | षोडश |
| B | द्वादश |
| C | चतुर्दश |
| D | सप्तदश |

| | |
|---|---|
| Q.No: 21 | तृतीयार्थे इत्यनेन भवति ? |
| A | तृतीयाविभक्तिः |
| B | कर्मप्रवचनीयसंज्ञा |

C करणसंज्ञा

D कर्मसंज्ञा

Q.No: 22 अन्तराऽन्तरेण युक्ते इत्यनेन भवति ?

A द्वितीया

B तृतीया

C पञ्चमी

D सप्तमी

Q.No: 23 "अनु हरिं सुरा:" इति कस्योदाहरणम् ?

A तृतीयार्थे

B अनुर्लक्षणे

C अनुर्यत्समया

D हीने

Q.No: 24 "दण्डेन घट:" इत्यत्र तृतीया केन सूत्रेण भवति ?

A तृतीयार्थे

B हीने

| | |
|---|---|
| **C** | हेतौ |
| D | इत्थंभूतलक्षणे |

| | |
|---|---|
| Q.No: 25 | क्रियार्थोपपदस्य च कर्मणि स्थानिन: इत्यनेन भवति ? |
| A | द्वितीया |
| B | तृतीया |
| C | पञ्चमी |
| **D** | चतुर्थी |

| | |
|---|---|
| Q.No: 26 | "प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने" इत्यनेन भवति ? |
| **A** | षष्ठी |
| B | सम्प्रदानसंज्ञा |
| C | चतुर्थी |
| D | सप्तमी |

| | |
|---|---|
| Q.No: 27 | तिरस्कारेऽर्थे प्राणिवर्जे मन्यते: कर्मणि भवति ? |
| A | षष्ठी |
| B | सप्तमी |

| | |
|---|---|
| C | पञ्चमी |
| D | चतुर्थी |

| Q.No: 28 | प्राग्दीव्यतोऽण्, इति सूत्रमस्ति ? |
|---|---|
| A | अधिकार: |
| B | विधि: |
| C | परिभाषा |
| D | अतिदेश: |

| Q.No: 29 | हरितादिभ्योऽञ: इत्यनेन भवति ? |
|---|---|
| A | अञ् |
| B | फक् |
| C | ढक् |
| D | फञ् |

| Q.No: 30 | भर्गात्त्रैगर्ते इत्यनेन गोत्रेऽर्थे विधीयते ? |
|---|---|
| A | अञ् |
| B | फक् |

| | |
|---|---|
| C | ढक् |
| **D** | फञ् |

| | |
|---|---|
| Q.No: 31 | क्षुद्राभ्यो वा इत्यस्योदाहरणमस्ति ? |
| A | गौधेर: |
| B | जाडार: |
| **C** | काणेर: |
| D | चाटकैर: |

| | |
|---|---|
| Q.No: 32 | गोत्रावयवात् इत्यनेन क: आदेशो विधीयते ? |
| **A** | ष्यङ् |
| B | ढञ् |
| C | ढक् |
| D | फञ् |

| | |
|---|---|
| Q.No: 33 | यञञोश्च इत्यस्योदाहरणं वर्तते ? |
| A | वात्स्य: |
| **B** | गर्गा: |
| C | गार्ग्य: |
| D | द्वैप्या: |

Q.No: 34 पैलादिभ्यश्च इत्यनेन भवति ?

A लोप:

B लुप्

**C** लुक्

D श्लु:

Q.No: 35 कृत्यप्रत्यया: कस्मिन्नर्थे भवन्ति ?

A कर्तृकर्मणो:

B कर्तृभावयो:

C कर्तृकरणयो:

**D** भावकर्मणो:

Q.No: 36 अचो यत् इत्यस्योदाहरणमस्ति ?

A इत्य:

**B** चेयम्

C शप्यम्

D लभ्यम्

| | |
|---|---|
| Q.No: 37 | "किर:" इत्यत्र क: प्रत्यय: ? |
| A | अच् |
| B | ट: |
| **C** | **क:** |
| D | इरच् |

| | |
|---|---|
| Q.No: 38 | भिक्षासेनादायेषु च इत्यनेन प्रत्ययो भवति ? |
| **A** | **ट:** |
| B | अच् |
| C | अण् |
| D | क: |

| | |
|---|---|
| Q.No: 39 | वशंवद: इत्यत्र क: प्रत्यय: ? |
| A | ट: |
| **B** | **खच्** |
| C | क: |
| D | खश् |

Q.No: 40

"खित्यनव्ययस्य" इत्यनेन भवति ?

A दीर्घः

B खः

C लुक्

**D ह्रस्वः**

Q.No: 41 "दर्शनीयमानी" केन णिनिप्रत्ययः ?

A सुप्यजातौ णिनिस्ताच्छील्ये

B करणे यजः

**C मनः**

D आत्ममाने खश्च

Q.No: 42 क्षैधातोः क्तप्रत्यये सति किं रूपम् ?

A क्षयितः

**B क्षामः**

C क्षातः

D क्षैतः

| Q.No: 43 | "सुपान:" इत्यत्र क: प्रत्यय: ? |
|---|---|
| **A** | **युच्** |
| B | युक् |
| C | ल्यु: |
| D | शानच् |

| Q.No: 44 | "अपामार्ग:" इत्यत्र क: प्रत्यय: ? |
|---|---|
| A | अञ् |
| B | अण् |
| **C** | **घञ्** |
| D | ट: |

| Q.No: 45 | अन्यथैवं कथमित्थंसु सिद्धाप्रयोगश्चेत् इत्यनेन भवति ? |
|---|---|
| A | घञ् |
| B | अञ् |
| C | घ: |
| **D** | **णमुल्** |

Q.No: 46 चयः इत्यत्र कः प्रत्ययः ?

| | |
|---|---|
| A | अच् |
| B | यत् |
| C | अप् |
| D | कः |

Q.No: 47 तथायुक्तं चानीप्सितम् इत्यनेन कर्मसंज्ञा भवति ?

| | |
|---|---|
| A | गृहं याति |
| B | पुस्तकं याचते रामम् |
| C | मथुरामास्ते |
| D | फलमदन् पठति पुस्तकम् |

Q.No: 48 राममध्यापयति न्यायशास्त्रम् इत्युदाहरणं भवति ?

| | |
|---|---|
| A | कर्तुरीप्सिततमं कर्म |
| B | अकथितं च |
| C | गतिबुद्धिप्रत्यावसनार्थशब्दकर्मा–० |
| D | अधिशीङ्स्थासां कर्म |

Q.No: 49 "अभिनिविशश्च" इति सूत्रं विदधाति ?

A कर्तृसंज्ञाम्

**B** कर्मसंज्ञाम्

C करणसंज्ञाम्

D सम्प्रदानसंज्ञाम्

Q.No: 50 पचति इत्यत्र शाब्दिकमते बोधो भवति ?

A पाकानुकूलाभावना

B भावनानुकूल: पाक:

**C** एकाश्रयक: पाकानुकूलव्यापार:

D पाकानुकूलव्यापारानुकूला कृति:

Q.No: 51 "सु: पूजायाम्" इति विहितकर्मप्रवचनीयसंज्ञाप्रयोजनमस्ति ?

A द्वितीयाविधानम्

B सप्तमीविधानम्

**C** षत्वाभावविधानम्

D अव्ययसंज्ञाविधानम्

Q.No: 52 "योजनं सरला गङ्गा" इत्युदाहरणम्, अस्य सूत्रस्य विद्यते ?

A कर्मणि द्वितीया

B अन्तराऽन्तरेण युक्ते

C कर्मप्रवचनीययुक्ते द्वितीया

**D** कालाध्वनोरत्यन्तसंयोगे

Q.No: 53 'अपवर्गे तृतीया' इत्यत्र अपवर्गपदार्थोऽस्ति ?

A मोक्षप्राप्तिः

B स्वर्गप्राप्तिः

C धनप्राप्तिः

**D** फलप्राप्तिः

Q.No: 54 महाभाष्यग्रन्थं विरचितवान् ?

**A** गोणिकापुत्रः

B दाक्षीपुत्रः

C सतीपुत्रः

D रङ्गोजिभट्टपुत्र:

Q.No: 55 वार्त्तिकानि विरचितानि सन्ति ?

A वररुचिना

B शाकलेन

C भारद्वाजेन

D गालवेन

Q.No: 56 सरस्वतीकण्ठाभरणव्याकरणग्रन्थ: कस्मिन् प्रदेशे लिखित: ?

A उत्तरभारते

B मध्यभारते

C दक्षिणभारते

D पूर्वभारते

Q.No: 57 पाणिनीयव्याकरणे प्रथम: प्रक्रियाग्रन्थकारोऽस्ति ?

A शेषकृष्ण:

B धर्मकीर्त्ति:

C रामचन्द्रः

D भट्टोजिदीक्षितः

Q.No: 58 शब्दकौस्तुभग्रन्थो विरचितः ?

A नागेशेन

B कौण्डभट्टेन

**C** भट्टोजिदीक्षितेन

D हरिजिदीक्षितेन

Q.No: 59 शब्दानुशासनस्य अपरं नाम वर्त्तते?

**A** व्याकरणम्

B प्रयोजकम्

C साक्षात्प्रयोजनम्

D आनुषाङ्गिकप्रयोजनम्

Q.No: 60 'स्थूलपृषती' इत्यत्रास्ति मुख्यःस्वरः ?

**A** पूर्वपदप्रकृतिस्वरः

| | |
|---|---|
| B | समासान्तोदात्त: |
| C | समासाद्युदात्त: |
| D | सर्वानुदात्त: |

| Q.No: 61 | अपशब्दैर्दुष्यति ? |
|---|---|
| A | वाग्योगविद् |
| B | अवाग्योगविद् |
| C | उभौ |
| D | नोभौ |

| Q.No: 62 | स्त्रीवत् प्रणाम: तं प्रति करणीयो य: ? |
|---|---|
| A | प्रत्यभिवादवाक्ये नाम्न: प्लुतिं जानाति । |
| B | प्रत्यभिवादवाक्ये नाम्न: प्लुतिं न जानाति । |
| C | प्रत्यभिवादवाक्ये नाम्न: प्लुतिं जानाति करोति च । |
| D | प्रत्यभिवादवाक्ये नाम्न: प्लुतिं न मनुते । |

| Q.No: 63 | चतुर्षु वाक् परिमितिपदेषु तुरीयां वाचं वदन्ति ? |
|---|---|

A पशव:

B पक्षिणः

**C** मनुष्या:

D जलचरा:

Q.No: 64 भद्रा लक्ष्मी: तेषां वाण्यां स्थिता ये ?

A मीमांसका:

**B** वैयाकरणा:

C नैयायिका:

D पौराणिका:

Q.No: 65 समुचितनामकरणे समर्था: सन्ति ?

**A** शाब्दिका:

B वैदिका:

C ज्योतिर्विद:

D मीमांसका:

Q.No: 66 सत्यदेवा: के भवन्ति पतञ्जलिमते ?

A मीमांसका:

B न्यायविद:

**C शब्दतत्त्वविद:**

D योगतत्त्वविद:

Q.No: 67 प्राकृतवैकृतभेदौ विद्येते ?

A द्रव्यस्य

B स्फोटस्य

**C ध्वने:**

D गुणस्य

Q.No: 68 स्फोटग्रहणे मुख्यं कारणमस्ति ?

**A प्राकृतध्वनि:**

B वैकृतध्वनि:

C उभौ

D कश्चिदन्य:

Q.No: 69

शाब्दिकसिद्धान्ते मुख्योऽस्ति ?

A वर्णस्फोट:

B पदस्फोट:

C अखण्डपदस्फोट:

D अखण्डवाक्यस्फोट:

Q.No: 70 शाब्दिकनये ब्रह्मण: स्वरूपमस्ति ?

A शिवतत्त्वात्मकम्

B नारायणतत्त्वात्मकम्

C शक्तितत्त्वात्मकम्

D शब्दतत्त्वात्मकम्

Q.No: 71 स्फोटस्य भेदा: सन्ति ?

A एकादश

B दश

C नव

D अष्ट

Q.No: 72 शब्दविवर्तसिद्धान्तोऽस्ति ?

A पुराणविदाम्

B वेदविदाम्

C न्यायविदाम्

D स्फोटविदाम्

Q.No: 73 शब्दब्रह्मणोपलब्धिसाधनं प्रतिमा चास्ति ?

A वेदः

B पुराणम्

C काव्यम्

D इतिहासः

Q.No: 74 वेदशाखासु शब्दानां दृश्यते मुख्यत्वेन ?

A प्रयोगः

B विचारः

C यत्शक्तितत्वम्

D किञ्चिदन्यत्

Q.No: 75 एकपदागमा विद्या युक्ता भवति ?

A चिद्रूपेण

B अचिद्रूपेण

C चिदचिद्रूपेण

D प्रणवरूपेण

Q.No: 76 स्फोटरूपं जगद् विवर्तोऽस्ति ?

A परब्रह्मण:

B नारायणब्रह्मण:

C शब्दब्रह्मण:

D शिवब्रह्मण:

Q.No: 77 अक्षरसमाम्नायपदेन गृह्यन्ते ?

A पाणिनिसूत्राणि

B योगसूत्राणि

C शिवसूत्राणि

D सांख्यसूत्राणि

Q.No: 78 शब्दपरायणं कथितवान् ब्रह्मविद् बृहस्पतिः ?

A चन्द्राय

B इन्द्राय

C शिवाय

D पाणिनये

Q.No: 79 महाभाष्यस्य प्रथमव्याख्याकारोऽस्ति ?

A भर्तृहरिः

B शेषकृष्णः

C नारायणभट्टः

D कौण्डभट्टः

Q.No: 80 भट्टोजिदीक्षितलिखितसिद्धान्तकौमुदीटीकायाः नाम विद्यते ?

A बालमनोरमा

B रत्नप्रभा

| | |
|---|---|
| C | प्रौढमनोरमा |
| D | तत्त्वबोधिनी |

| | |
|---|---|
| Q.No: 81 | भर्तृहरिविरचितव्याकरणदर्शनग्रन्थोऽस्ति ? |
| A | शतकत्रयम् |
| B | महाभाष्यदीपिका |
| C | वाक्यपदीयम् |
| D | भागवृत्तिः |

| | |
|---|---|
| Q.No: 82 | काशिकान्यासकारोऽस्ति ? |
| A | हरदत्तः |
| B | कैयटः |
| C | जिनेन्द्रबुद्धिः |
| D | नागेशः |

| | |
|---|---|
| Q.No: 83 | नागेशस्योद्योतटीका विद्यते ? |
| A | वाक्यपदीये |
| B | |

|  |  |
| --- | --- |
|  | वाक्यपदीयस्वोपज्ञटीकायाम् |
| **C** | महाभाष्यप्रदीपे |
| D | काशिकापदमञ्जर्याम् |

| Q.No: 84 | शिवसूत्रेषु णकाराद्यनुबन्धकर्त्ता भवति ? |
| --- | --- |
| A | पाणिनि: |
| **B** | स्वयं शिव: |
| C | व्याडि: |
| D | पतञ्जलि: |

| Q.No: 85 | शाब्दिकेषु परमप्रमाणग्रन्थोऽस्ति ? |
| --- | --- |
| A | वाक्यपदीयम् |
| **B** | महाभाष्यम् |
| C | व्याकरणसिद्धान्तसुधानिधि: |
| D | शब्दकौस्तुभ: |

| Q.No: 86 | कैयटजनकस्य नाम विद्यते ? |
| --- | --- |

| | | |
|---|---|---|
| **A** | जैय्यटः | |
| B | उव्वटः | |
| C | रुद्रटः | |
| D | मम्मटः | |

| | |
|---|---|
| Q.No: 87 | नागेशस्य पितुर्नाम वर्त्तते ? |
| A | रामदत्तः |
| B | विष्णुदत्तः |
| C | कृष्णदत्तः |
| **D** | शिवभट्टः |

| | |
|---|---|
| Q.No: 88 | पाणिनिलिखितमहाकाव्यमस्ति ? |
| **A** | जाम्बवतीविजयम् |
| B | यादवाभ्युदयम् |
| C | धातुकाव्यम् |
| D | कृष्णचरितकाव्यम् |

Q.No: 89

क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्वेनाभिधीयमानो भवति ?

A फलम्

B सिद्धाक्रिया

C संख्या

D साध्याक्रिया

Q.No: 90 वाक्यस्य प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो भवति ?

A आनुमानिकनये

B शाब्दिकनये

C भाट्टनये

D नागेशमते

Q.No: 91 कर्तृकर्मणो: तिङर्थत्वे प्रमाणमस्ति ?

A कर्तृकर्मणो: कृति

B कर्तृकरणे कृता बहुलम्

C कर्तृकर्मणोश्च भूकृञो:

D ल: कर्मणि च भावे चाकर्मकेभ्य:

Q.No: 92 कर्तृकर्मसंख्याकाला एतेऽर्थाः सन्ति ?

A धातोः

**B तिङाम्**

C प्रातिपदिकस्य

D कृताम्

Q.No: 93 एकाश्रयिकावर्तमानकालिकी गलविलाधसंयोगानुकूलाभावना इति बोधः खादति पदस्य भवति ?

A बौद्धमते

**B भाट्टमते**

C प्रमाणविन्मते

D सांख्यमते

Q.No: 94 तङ् - यक् - चिणादयः एते, आश्रयाऽन्वयं व्यञ्जयन्ति ?

A काले

B धातौ

**C फले**

D

| | |
|---|---|
| | कर्तरि |

| | |
|---|---|
| Q.No: 95 | ईप्सिततमं कर्म भवति ? |
| **A** | त्रिविधम् |
| B | चतुर्विधम् |
| C | पञ्चविधम् |
| D | षड्विधम् |

| | |
|---|---|
| Q.No: 96 | कर्मवद्भावो न भवति एतस्मिन् कर्मणि ? |
| A | निर्वर्त्ये |
| B | विकार्ये |
| **C** | प्राप्ये |
| D | कस्मिँस्चिदन्यस्मिन् |

| | |
|---|---|
| Q.No: 97 | फलव्यापारौ धात्वर्थः इति मतमस्ति ? |
| A | सांख्यविदः |
| **B** | |

| | |
|---|---|
| | प्राचीन-वैयाकरणानाम् |
| C | वाक्यविदः |
| D | योगविदः |

| | |
|---|---|
| Q.No: 98 | कालस्यान्वयो भवति शाब्दिकमते ? |
| A | संख्यायाम् |
| B | फले |
| **C** | व्यापारे |
| D | आश्रये |

| | |
|---|---|
| Q.No: 99 | फलव्यापारयोः भिन्नाधिकरणवृत्तितायां धातुर्भवति ? |
| A | अकर्मकः |
| **B** | सकर्मकः |
| C | द्विकर्मकः |
| D | कश्चिदन्यः |

| | |
|---|---|
| Q.No: 100 | यद्व्यापाराव्यहितफलमुपजायते तद्भवति ? |

| | |
|---|---|
| **A** | करणम् |
| B | सम्प्रदानम् |
| C | अपादानम् |
| D | अधिकरणम् |

| Q.No: 101 | प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्यफलाश्रयत्वेनेच्छाविषयत्वमिति लक्षणमस्ति ? |
|---|---|
| A | कर्तुः |
| **B** | कर्मणः |
| C | करणस्य |
| D | अधिकरणस्य |

| Q.No: 102 | शुद्धः, प्रयोजकः, कर्मकर्ता इति भेदाः भवन्ति ? |
|---|---|
| **A** | कर्तुः |
| B | कर्मणः |
| C | करणस्य |
| D | सम्प्रदानस्य |

| Q.No: 103 | चैत्रः चैत्रं गच्छति इति वाक्यं वार्यते वैयाकरणैः ? |
|---|---|
| A | |

| | |
|---|---|
| | परसमवेतत्वनिवेशाद् |
| B | फलाश्रयाभावात् |
| C | एकस्योभयसंज्ञाया असम्भवात् |
| **D** | परया कर्तृसंज्ञया बाधात् |

| | |
|---|---|
| Q.No: 104 | द्वितीयातृतीयासप्तमीविभक्तीनामर्थो भवति शाब्दिकमते? |
| A | भावना |
| B | कृति: |
| C | फलम् |
| **D** | आश्रय: |

| | |
|---|---|
| Q.No: 105 | चतुर्थीविभक्तेरर्थो भवति ? |
| A | दानम् |
| B | देयवस्तु |
| **C** | उद्देश्यम् |
| D | उदासीनम् |

| | |
|---|---|
| Q.No: 106 | अनिराकरणात् प्रेरणात् अनुमते:, इति त्रिविधं स्वरूपं भवति ? |

A कर्तुः

B कर्मणः

**C** सम्प्रदानस्य

D अपादानस्य

Q.No: 107 विश्लेषहेतुक्रियाश्रयप्रतियोगिकाभाववत्वे सति विभागाश्रयत्वमिति लक्षणमस्ति ?

A करणस्य

B सम्प्रदानस्य

**C** अपादानस्य

D अधिकरणस्य

Q.No: 108 निर्दिष्टविषयं, किञ्चिदुपात्तविषयम् अपेक्षितक्रियम् इति भेदाः भवन्ति ?

A करणस्य

B सम्प्रदानस्य

**C** अपादानस्य

D अधिकरणस्य

Q.No: 109 कर्तृकर्मद्वारा क्रियाजनकत्वे सति आश्रयनिष्ठोद्देश्यतानिरूपितविधेयतावत्वमिति लक्षणं वर्तते ?

A कर्तुः

B

| | |
|---|---|
| | कर्मण: |
| C | अपादानस्य |
| **D** | अधिकरणस्य |

| | |
|---|---|
| Q.No: 110 | प्रकृतधात्वर्थप्रधानीभूतव्यापारनिष्ठाधेयतानिरूपिताश्रयतात्वमिति लक्षणेन गृह्यते ? |
| **A** | कर्ता |
| B | कर्म |
| C | करणम् |
| D | अधिकरणम् |

| | |
|---|---|
| Q.No: 111 | भाट्टमते धात्वर्थो भवति ? |
| **A** | फलम् |
| B | व्यापार: |
| C | उभौ |
| D | कश्चिदन्य: |

| | |
|---|---|
| Q.No: 112 | प्राचीनमीमांसकमते धात्वर्थोऽस्ति ? |
| A | फलम् |
| **B** | व्यापार: |
| C | |

काल:

D कृति:

Q.No: 113 शाब्दबोधे करणं भवति ?

A ज्ञायमानं पदम्

B शक्तियुक्तं पदम्

C शक्तिरहितं पदम्

**D** पदज्ञानम्

Q.No: 114 पदार्थधी: शाब्दबोधे किं भवति ?

A स्मरणम्

B ज्ञानम्

**C** व्यापार:

D करणम्

Q.No: 115 न्यायमते वृत्तिर्भवति ?

**A** द्विधा

B त्रिधा

C चतुर्धा

| | |
|---|---|
| D | पञ्चधा |

| Q.No: 116 | ईश्वरेच्छा भवति ? |
|---|---|
| A | लक्षणा |
| **B** | शक्तिः |
| C | व्यञ्जना |
| D | तात्पर्याख्या |

| Q.No: 117 | शक्तिरूपः सम्बन्धो भवति ? |
|---|---|
| A | पदेन सह पदस्य |
| B | पदेन सह लक्ष्यार्थस्य |
| C | पदेन सह व्यङ्ग्यार्थस्य |
| **D** | पदेन सह पदार्थस्य |

| Q.No: 118 | शक्तिग्रहं वदन्ति ? |
|---|---|
| **A** | वृद्धाः |
| B | युवानः |
| C | मातरः |
| D | बालिकाः |

| | |
|---|---|
| Q.No: 119 | न्यायनये आख्यातार्थो भवति ? |
| A | भावना |
| **B** | कृतिः |
| C | व्यापारः |
| D | कर्ता |

| | |
|---|---|
| Q.No: 120 | "जानाति" इत्यत्र लक्षणा भवति ? |
| A | कर्तृत्वे |
| B | कर्मत्वे |
| **C** | आश्रयत्वे |
| D | करणत्वे |

| | |
|---|---|
| Q.No: 121 | नश्यति इत्यत्र लक्षणया आख्यातार्थो वर्तते ? |
| **A** | प्रतियोगित्वम् |
| B | अनुयोगित्वम् |
| C | सम्बन्धित्वम् |
| D | विपर्ययत्वम् |

| Q.No: 122 | नीलादिपदानां नीलविशिष्टे शक्तिर्जायते ? |
|---|---|
| **A** | **कोशेन** |
| B | व्याकरणेन |
| C | वेदान्तेन |
| D | मीमांसया |

| Q.No: 123 | पुत्रस्ते जातः, कन्या ते गर्भिणी इत्यत्र सुखदुःखयोः समानत्वं न्यायमते प्रतीयते ? |
|---|---|
| A | व्यञ्जनया |
| B | प्रत्यक्षेण |
| C | लक्षणया |
| **D** | **अनुमानेन** |

| Q.No: 124 | यवपदस्य वाक्यशेषात् शक्तिर्भवति ? |
|---|---|
| A | कङ्गौ |
| B | धान्ये |
| **C** | **दीर्घशूके** |
| D | जले |

Q.No: 125 "शक्तं पदम्" कतिविधम् ?

A एकविधम्

B द्विविधम्

C त्रिविधम्

**D चतुर्विधम्**

Q.No: 126 योगरुढस्योदाहरणमस्ति ?

A घट:

**B पङ्कजम्**

C मण्डपम्

D रथन्तरम्

Q.No: 127 शक्यसम्बन्धो भवति ?

A व्यञ्जना

B शक्ति:

**C लक्षणा**

D तात्पर्यम्

| Q.No: 128 | "काकेभ्यो दधि रक्ष्यताम्" इत्यत्र काकपदस्य लक्षणा भवति ? |
|---|---|
| **A** | दध्युपघातके |
| B | काके |
| C | शुनि |
| D | बिडाले |

| Q.No: 129 | काकेभ्यो दधि रक्ष्यताम् इत्यत्र का विज्ञायते ? |
|---|---|
| A | जहत्स्वार्था लक्षणा |
| **B** | अजहत्स्वार्थालक्षणा |
| C | जहदजहल्लक्षणा |
| D | शक्तिः |

| Q.No: 130 | द्विरेफपदस्य सम्बन्धो भ्रमरे विज्ञायते ? |
|---|---|
| A | लक्षणया |
| B | व्यञ्जनया |
| **C** | लक्षितलक्षणया |
| D | शक्त्या |

| Q.No: 131 | चित्रगुरित्यादौ गोपदस्य लक्षणा भवति ? |
|---|---|
| A | गवि |
| B | वृषभे |
| C | गोवत्से |
| **D** | गोस्वामिनि |

| Q.No: 132 | पूर्वपदे लक्षणा भवति ? |
|---|---|
| A | अव्ययीभावे |
| **B** | तत्पुरुषे |
| C | बहुव्रीहौ |
| D | द्वन्द्वे |

| Q.No: 133 | कर्मधारयस्थले बोधो भवति ? |
|---|---|
| A | भेदमूलकः |
| **B** | अभेदमूलकः |
| C | उभयमूलकः |
| D | संयोगमूलकः |

Q.No: 134 "निषादस्थपतिं याजयेत्" अनेन समासनिर्णये न्याय: ज्ञाप्यते ?

A गुणभूत:

B गौरवमूलक:

C मुख्यभूत:

D लघुमूलक:

Q.No: 135 एकपदार्थेऽपरपदार्थसम्बन्ध उच्यते ?

A अभिधा

B योग्यता

C आसत्ति:

D लक्षणा

Q.No: 136 वह्निना सिञ्चति इत्यत्र न वर्तते ?

A शक्ति:

B आसत्ति:

C उपपत्ति:

D योग्यता

Q.No: 137 तात्पर्यं परिकीर्तितम् ?

| | | |
|---|---|---|
| A | इच्छा | |
| B | ईश्वरेच्छा | |
| **C** | वक्तुरिच्छा | |
| D | वक्तुर्ज्ञानम् | |

| | |
|---|---|
| Q.No: 138 | अव्ययीभावो भवति ? |
| A | उत्तरपदार्थप्रधान: |
| **B** | पूर्वपदार्थप्रधान: |
| C | उभयपदार्थप्रधान: |
| D | अन्यपदार्थप्रधान: |

| | |
|---|---|
| Q.No: 139 | स्तोकान्तिकदूरार्थकृच्छ्राणिक्तेन इत्यनेन भवति ? |
| A | तृतीयासमास: |
| B | चतुर्थीसमास: |
| **C** | पञ्चमीसमास: |
| D | सप्तमीसमास: |

| | |
|---|---|
| Q.No: 140 | अतद्गुणसंविज्ञानबहुव्रीहे: उदाहरणं किम् ? |
| A | |

| | |
|---|---|
| | लम्बकर्ण: |
| B | पीताम्बर: |
| C | कण्ठेकाल: |
| **D** | **चित्रगु:** |

| | |
|---|---|
| Q.No: 141 | दिक्पूर्वदात् संज्ञायाम् भवति ? |
| A | ट: |
| **B** | **ञ:** |
| C | टच् |
| D | क: |

| | |
|---|---|
| Q.No: 142 | कर्मधारयसमास: तद्भेदत्वेन कुत्र पठित: ? |
| A | अव्ययीभावे |
| B | बहुव्रीहौ |
| **C** | **तत्पुरुषे** |
| D | द्वन्द्वे |

| | |
|---|---|
| Q.No: 143 | गोस्त्रियोरूपसर्जनस्य इत्यनेन भवति ? |
| **A** | **ह्रस्व:** |

B पुंवद्भाव:

C समास:

D टच् प्रत्यय:

Q.No: 144 तत्पुरुषस्याङ्गुले: संख्याव्ययादे: इत्यनेन भवति ?

A टच्

B अण्

C क:

**D अच्**

Q.No: 145 जलजाक्षी इत्यत्र समासान्तप्रत्ययो भवति ?

A टच्

**B षच्**

C अण्

D अप्

Q.No: 146 निष्ठाप्रत्ययान्त: शब्द: बहुव्रीहौ कुत्र प्रयुज्यते ?

A मध्ये

B

| | |
|---|---|
| | पूर्वे परे च |
| **C** | पूर्वे |
| D | परे |

| | |
|---|---|
| Q.No: 147 | "शिवकेशवौ" इत्यत्र कस्मिन् चार्थे द्वन्द्वसमासो भवति ? |
| A | समुच्चये |
| B | अन्वाचये |
| C | समाहारे |
| **D** | इतरेतरयोगे |

| | |
|---|---|
| Q.No: 148 | "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इत्यनेन भवति ? |
| A | समासान्तः |
| **B** | एकवद्भावः |
| C | पुंवद्भावः |
| D | ह्रस्वः |

| | |
|---|---|
| Q.No: 149 | गम् धातोः लङ्लकारस्य प्रथमपुरुषैकवचने किं रूपम् ? |
| **A** | अगच्छत् |

| | |
|---|---|
| B | अगमत् |
| C | अगमः |
| D | अगमिष्यत् |

| | |
|---|---|
| Q.No: 150 | भूधातोः लोट्लकारस्य उत्तमपुरुषद्विवचने किं रूपम् ? |
| A | भवावः |
| **B** | भवाव |
| C | भवेव |
| D | भूयास्व |

| | |
|---|---|
| Q.No: 151 | व्रजधातोः लुङ्लकारस्य प्रथमपुरुषैकवचने किं रूपम् ? |
| A | अव्रजीत् |
| B | अव्रजत् |
| C | अव्राजित् |
| **D** | अव्राजीत् |

| | |
|---|---|
| Q.No: 152 | पा पाने धातोः आशीर्लिङः प्रथमपुरुषैकवचने किं रूपम् ? |
| A | पायात् |
| B | |

| | |
|---|---|
| | पाय्यात् |
| **C** | पेयात् |
| D | पिब्यात् |

| | |
|---|---|
| Q.No: 153 | त्रपूष् धातोः लिटः प्रथमपुरुषस्यैकवचने किं रूपम् ? |
| **A** | त्रेपे |
| B | तत्रापे |
| C | तेपे |
| D | तत्रपे |

| | |
|---|---|
| Q.No: 154 | एध् धातोः लङ्लकारस्य उत्तमपुरुषैकवचने किं रूपम् ? |
| A | ऐधेय |
| **B** | ऐधे |
| C | ऐधै |
| D | एधेय |

| | |
|---|---|
| Q.No: 155 | दयायासश्च इत्यनेन विधीयते ? |
| A | रम् |
| B | सम्प्रसारणम् |
| C | |

| | |
|---|---|
| | परस्मैपदभावः |
| **D** | आम् |

| Q.No: 156 | "भृञ् भरणे" धातोः आशीर्लिङि- परस्मैपदे प्रथमपुरुषैकवचने किं रूपम् ? |
|---|---|
| A | भ्रीयात् |
| B | भृयात् |
| **C** | भ्रियात् |
| D | भ्रीर्यात् |

| Q.No: 157 | अदः सर्वेषाम् इत्यनेन भवति ? |
|---|---|
| A | इट् |
| **B** | अट् |
| C | घस्लृ |
| D | धिः |

| Q.No: 158 | ''एधि'' इति कस्य धातोः रूपम् ? |
|---|---|
| **A** | अस् भुवि |
| B | इङ् अध्ययने |
| C | |

| | |
|---|---|
| | इण् गतौ |
| D | इन्धी दीप्तौ |

| | |
|---|---|
| Q.No: 159 | क्सस्याचि इत्यनेन भवति ? |
| A | क्सादेश: |
| B | दीर्घ: |
| C | ईट् |
| **D** | लोप: |

| | |
|---|---|
| Q.No: 160 | ब्रूञ् धातो: लिट्लकारे प्रथमपुरुषैकवचने किं रूपम् ? |
| A | बब्रुव |
| B | बब्राव |
| **C** | उवाच |
| D | ब्रुवे |

| | |
|---|---|
| Q.No: 161 | अधिजगे इति रूपं वर्त्ततेऽस्य धातो: ? |
| A | गैधातो: |
| B | गम् धातो: |

| | |
|---|---|
| C | इङ्धातोः |
| D | गृधातोः |

| | |
|---|---|
| Q.No: 162 | अचकमत इति रूपमस्ति ? |
| A | लटः |
| B | लङः |
| C | लुङः |
| D | लृङः |

| | |
|---|---|
| Q.No: 163 | श्रीयात् इति पदमस्ति ? |
| A | श्रीयशब्दस्य पञ्चम्यन्तम् |
| B | विधिलिङः |
| C | आशिष् लिङः |
| D | लोटः |

| | |
|---|---|
| Q.No: 164 | हरिशब्दस्य सप्तम्येकवचने रूपं निष्पद्यते ? |
| A | हरे |
| B | हरी |
| C | हर्योः |

| | |
|---|---|
| **D** | हरौ |

| Q.No: 165 | ज्ञानशब्दो नपुंसकलिङ्गे एव भवति ? |
|---|---|
| **A** | भावल्युडन्तः |
| B | कर्मल्युडन्तः |
| C | करणल्युडन्तः |
| D | अधिकरणल्युडन्तः |

| Q.No: 166 | ग्लौशब्दस्य लिङ्गमस्ति ? |
|---|---|
| **A** | पुल्लिङ्गम् |
| B | स्त्रीलिङ्गम् |
| C | नपुंसकलिङ्गम् |
| D | पुन्नपुंसकलिङ्गम् |

| Q.No: 167 | हरिभ्यामिति रूपं न निष्पद्यते ? |
|---|---|
| A | तृतीयायाम् |
| B | चतुर्थ्याम् |
| C | पञ्चम्याम् |

| | |
|---|---|
| D | षष्ठ्याम् |

| | |
|---|---|
| Q.No: 168 | भानुशब्दस्य षष्ठीबहुवचने रूपमस्ति ? |
| A | भान्वाम् |
| B | भानुनाम् |
| C | भानूनाम् |
| D | भानवाम् |

| | |
|---|---|
| Q.No: 169 | रैशब्दस्य तृतीयाद्विवचने रूपं भवति ? |
| A | रैभ्याम् |
| B | राभ्याम् |
| C | रायभ्याम् |
| D | रायाभ्याम् |

| | |
|---|---|
| Q.No: 170 | ज्ञानशब्दस्य 'ज्ञाने' इति रूपं न भवति ? |
| A | प्रथमाविभक्तौ |
| B | द्वितीयाविभक्तौ |
| C | षष्ठीविभक्तौ |
| D | सप्तमीविभक्तौ |

| | |
|---|---|
| Q.No: 171 | हरिशब्दस्य द्वितीयाद्विवचने रूपं भवति ? |
| A | हरौ |
| B | हर्यौ |
| C | हरी |
| D | हरयौ |

| | |
|---|---|
| Q.No: 172 | रायः इति रूपं न भवति रैशब्दस्य ? |
| A | प्रथमायाम् |
| B | द्वितीयायाम् |
| C | तृतीयायाम् |
| D | पञ्चम्याम् |

| | |
|---|---|
| Q.No: 173 | ऐऔच् इति सूत्रारम्भसामार्थ्यात् एतयोः सवर्णसंज्ञा न भवति ? |
| A | इ + ई |
| B | उ + ऊ |
| C | ओ + औ |
| D | ऋ + ॠ |

Q.No: 174 एचामयं भेदो नास्ति ?

| | |
|---|---|
| A | ह्रस्वभेद: |
| B | दीर्घभेद: |
| C | प्लुतभेद: |
| D | उदात्तादिभेद: |

Q.No: 175 लण् घटकणकारमादाय प्रत्याहारा: भवन्ति ?

| | |
|---|---|
| A | एक: |
| B | द्वौ |
| C | त्रय: |
| D | चत्वार: |

Q.No: 176 संयोगान्तलोपो निषिद्ध्यते ?

| | |
|---|---|
| A | यण: |
| B | यञ: |
| C | यम: |
| D | यय: |

Q.No: 177 बुद्धि: पर्यवतिष्ठते इत्यत्राच्सन्धिरस्ति ?

| | |
|---|---|
| A | |

| | |
|---|---|
| | यण् सन्धि: |
| B | गुणसन्धि: |
| C | दीर्घसन्धि: |
| D | वृद्धिसन्धि: |

| | |
|---|---|
| Q.No: 178 | सङ्गस्तेषूपजायते इत्यत्र सन्धिरस्ति ? |
| A | यण् |
| B | गुण: |
| C | वृद्धि: |
| D | दीर्घ: |

| | |
|---|---|
| Q.No: 179 | पतञ्जलिरित्यस्य सन्धिविच्छेदो भवति ? |
| A | पत + अञ्जलि: |
| B | पत् + अञ्जलि: |
| C | पतत् + अञ्जलि: |
| D | पतम् + जलि: |

| | |
|---|---|
| Q.No: 180 | कामक्रोधोद्भवं वेगम् इत्यत्र अच् सन्धिरस्ति ? |

| | | |
|---|---|---|
| A | गुण: | |
| B | वृद्धि: | |
| C | पररूपम् | |
| D | पूर्वरूपम् | |

| Q.No: 181 | सीमन्त: इत्यत्र सन्धिरस्ति ? |
|---|---|
| A | पररूपम् |
| B | पूर्वरूपम् |
| C | सन्ध्यभाव: |
| D | गुण: |

| Q.No: 182 | अप + ऋच्छति इत्यत्र का सन्धि: भविष्यति ? |
|---|---|
| A | गुण: |
| B | वृद्धि: |
| C | पररूपम् |
| D | पूर्वरूपम् |

| Q.No: 183 | वर्धेते इमौ मृगौ इत्यत्र सन्धिरस्ति ? |
|---|---|

| | |
|---|---|
| A | अयादिसन्धिः |
| B | गुणसन्धिः |
| **C** | प्रकृतिभावसन्धिः |
| D | सन्ध्यभावः |

| Q.No: 184 | <u>गवामृत</u>मित्यत्र सन्धिरस्ति ? |
|---|---|
| A | अयादिसन्धिः |
| **B** | अवङादेशसन्धिः |
| C | पूर्वरूपसन्धिः |
| D | पररूपसन्धिः |

| Q.No: 185 | <u>वनेऽपि</u> दोषाः प्रभवन्ति रागिणाम् इत्यत्र सन्धिरस्ति ? |
|---|---|
| A | पररूपम् |
| **B** | पूर्वरूपम् |
| C | गुणः |
| D | प्रकृतिभावः |

| Q.No: 186 | <u>अल्पश्च</u> कालः इत्यत्र सन्धिरस्ति ? |
|---|---|

| | | |
|---|---|---|
| A | ष्टुत्वम् |
| **B** | **श्चुत्वम्** |
| C | जश्त्वम् |
| D | कश्चिदन्य: |

| | |
|---|---|
| Q.No: 187 | समो मकारस्य राट्शब्दे परे अनुस्वारो न भवति ? |
| A | निपातनात् |
| B | निषेधात् |
| C | विधायकाभावात् |
| **D** | **मकारविधानसामर्थ्यात्** |

| | |
|---|---|
| Q.No: 188 | हत्वार्थकामांस्तु गुरुनिहैव इत्यत्र रुत्वादिसन्धिर्भवति अनेन सूत्रेण **?** |
| A | समः सुटि |
| B | पुमः खय्यम्परे |
| **C** | **नश्छव्यप्रशान्** |
| D | नृन् पे |

| | |
|---|---|
| Q.No: 189 | प्राणाघातान्निवृत्तिरित्यत्र सन्धिरस्ति ? |

| | |
|---|---|
| A | श्चुत्वम् |
| B | जश्त्वम् |
| C | अनुस्वार: |
| **D** | अनुनासिक: |

| | |
|---|---|
| Q.No: 190 | चिक्रेथ इति रूपं भवति ? |
| A | कृञ् करणे |
| **B** | क्रीञ् द्रव्यविनिमये |
| C | कृ विक्षेपे |
| D | कृञ् हिंसायाम् |

| | |
|---|---|
| Q.No: 191 | एष्टा इति रूपं भवति ? |
| A | ईक्ष दर्शने धातो: |
| B | इण् गतौ धातो: |
| **C** | इषु इच्छायाम् धातो: |
| D | इन्धी दीप्तौ धातोः |

| | |
|---|---|
| Q.No: 192 | वृञ् धातो: लुट: प्रथमपुरुषैकवचने रूपमस्ति ? |

| | |
|---|---|
| A | वर्त्ता |
| B | वरिता |
| C | वरीता |
| **D** | वरिता, वरीता |

| | |
|---|---|
| Q.No: 193 | चोरयामासुः इति रूपं वर्त्तते ? |
| A | आशिष् लिङ: |
| B | लोट: |
| C | विधिलिङ: |
| **D** | लिट: |

| | |
|---|---|
| Q.No: 194 | अजीगणत्, अजगणत् इति रूपं सिध्यति ? |
| A | भ्वादिगणे |
| B | तनादिगणे |
| C | क्र्यादिगणे |
| **D** | चुरादिगणे |

| | |
|---|---|
| Q.No: 195 | 'हुश्नुवो सार्वधातुके' इति सूत्रं करोति ? |
| A | |

| | |
|---|---|
| | वृद्धिम् |
| B | गुणम् |
| C | द्वित्वम् |
| D | यणम् |

| | |
|---|---|
| Q.No: 196 | द्रव्यगुणक्रियात्मककार्यत्रयनिरूपितनिर्व्यापारसव्यापारवृत्तिमान् भवति ? |
| A | द्रव्यम् |
| B | गुण: |
| C | उपाधि: |
| D | हेतु: |

| | |
|---|---|
| Q.No: 197 | सहस्रेण सहस्राय वा क्रीता शाटिका इयम् इत्युदाहरणं भवति ? |
| A | धारेरुत्तमर्ण: |
| B | स्पृहेरीप्सित: |
| C | परिक्रयणे सम्प्रदानमन्यतस्याम् |
| D | क्रियार्थोपपदस्य च कर्मणि स्थानिन: |

| | |
|---|---|
| Q.No: 198 | शकारेत्संज्ञकस्य धातुविहितप्रत्ययस्य संज्ञा भवति ? |

| | |
|---|---|
| **A** | सार्वधातुकम् |
| B | आर्धधातुकम् |
| C | उभे |
| D | काचिदन्या |

| | |
|---|---|
| Q.No: 199 | वैयाकरणमते कस्य शब्दत्वापत्तिरिष्यते ? |
| A | पदस्य |
| B | वायो: |
| **C** | ज्ञानस्य |
| D | अणो: |

| | |
|---|---|
| Q.No: 200 | क्रिया भेदिका भवति ? |
| A | व्यापारस्य |
| **B** | कालस्य |
| C | फलस्य |
| D | पदस्य |